শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে বালকাণ্ডে

# ॥ চতুর্থঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# ॥ চতুর্থঃ সর্গঃ ॥

## ৱাল্মীকিশ্চতুর্ৱিংশতিসহস্রশ্লোকযুতং রামাযণং কাৱ্যং নির্মায কুশীলৱৌ তদধ্যাপযৎ, তযো রামাযণগানং শ্রুৎৱা মুনিভিঃ প্রশংসনমযোধ্যাযাং শ্রীরামেণ সম্মানিতাভ্যাং তাভ্যাং তদীযরাজসভাযাং রামাযণগানশ্রাৱণম্

প্রাপ্তরাজ্যস্য রামস্য ৱাল্মীকির্ভগৱানৃষিঃ।
চকার চরিতং কৃৎস্নং ৱিচিত্রপদমর্থৱৎ॥ **1.4.1** ॥

চতুর্ৱিংশৎসহস্রাণি শ্লোকানামুক্তৱানৃষিঃ।
তথা সর্গশতান্ পঞ্চ ষটকাণ্ডানি তথোত্তরম্॥ **1.4.2** ॥

কৃৎৱা তু তন্মহাপ্রাজ্ঞঃ সভৱিষ্যং সহোত্তরম্।
চিন্তযামাস কো ন্ৱেতৎ প্রযুঞ্জীযাদিতি প্রভুঃ॥ **1.4.3** ॥

তস্য চিন্তযমানস্য মহর্ষের্ভাৱিতাত্মনঃ।
অগৃহ্ণীতাং ততঃ পাদৌ মুনিৱেষৌ কুশীলৱৌ॥ **1.4.4** ॥

কুশীলৱৌ তু ধর্মজ্ঞৌ রাজপুত্রৌ যশস্ৱিনৌ।
ভ্রাতরৌ স্ৱরসম্পন্নৌ দদর্শাশ্রমৱাসিনৌ॥ **1.4.5** ॥

স তু মেধাৱিনৌ দৃষ্টৱা ৱেদেষু পরিনিষ্ঠিতৌ।
ৱেদোপবৃংহণার্থায তাৱগ্রাহযত প্রভুঃ॥ **1.4.6** ॥

কাৱ্যং রামাযণং কৃৎস্নং সীতাযাশ্চরিতং মহৎ।
পৌলস্ত্যৱধমিত্যেৱং চকার চরিতব্রতঃ॥ **1.4.7**॥

পাঠ্যে গেযে চ মধুরং প্রমাণৈস্ত্রিভিরন্বিতম্।
জাতিভিঃ সপ্তভির্যুক্তং তন্ত্রীলযসমন্বিতম্॥ **1.4.8**॥

রসৈঃ শৃঙ্গারকরুণহাস্যরৌদ্রভযানকৈঃ।
ৱীরাদিভী রসৈর্যুক্তং কাৱ্যমেতদগাযতাম্॥ **1.4.9**॥

তৌ তু গান্ধর্ৱতত্ত্বজ্ঞৌ স্থানমূর্চ্ছনকোৱিদৌ।
ভ্রাতরৌ স্বরসম্পন্নৌ গন্ধর্ৱাৱিৱ রূপিণৌ॥ **1.4.10**॥

রূপলক্ষণসম্পন্নৌ মধুরস্বরভাষিণৌ।
বিম্বাদিৱোত্থিতৌ বিম্বৌ রামদেহাৎ তথাপরৌ॥ **1.4.11**॥

তৌ রাজপুত্রৌ কার্ত্স্ন্যেন ধর্ম্যমাখ্যানমুত্তমম্।
ৱাচোৱিধেযং তৎসর্ৱং কৃৎৱা কাৱ্যমনিন্দিতৌ॥ **1.4.12**॥

ঋষীণাং চ দ্বিজাতীনাং সাধূনাং চ সমাগমে।
যথোপদেশং তত্ত্বজ্ঞৌ জগতুঃ সুসমাহিতৌ॥ **1.4.13**॥

মহাত্মানৌ মহাভাগৌ সর্ৱলক্ষণলক্ষিতৌ।
তৌ কদাচিৎ সমেতানামৃষীণাং ভাৱিতাত্মনাম্॥ **1.4.14**॥

মধ্যে সভং সমীপস্থাৱিদং কাৱ্যমগাযতাম্।
তচ্ছ্রুৎৱা মুনযঃ সর্ৱে বাষ্পপর্যাকুলেক্ষণাঃ॥ **1.4.15**॥

সাধু সাধ্ৱিতি তাৱূচুঃ পরং ৱিস্মযমাগতাঃ।
তে প্রীতমনসঃ সর্ৱে মুনযো ধর্মৱৎসলাঃ॥ **1.4.16**॥

প্রশশংসুঃ প্রশস্তৱ্যৌ গাযমানৌ কুশীলৱৌ।
অহো গীতস্য মাধুর্যং শ্লোকানাং চ ৱিশেষতঃ॥ **1.4.17**॥

চিরনির্ব্বৃত্তমপ্যেতৎ প্রত্যক্ষমিৱ দর্শিতম্।
প্রৱিশ্য তাৱুভৌ সুষ্ঠু তথাভাৱমগাযতাম্॥ **1.4.18** ॥

সহিতৌ মধুরং রক্তং সম্পন্নং স্বরসম্পদা।
এৱং প্রশস্যমানৌ তৌ তপঃ শ্লাঘ্যৈর্মহর্ষিভিঃ॥ **1.4.19** ॥

সংরক্ততরমত্যর্থং মধুরং তাৱগাযতাম্।
প্রীতঃ কশ্চিন্মুনিস্তাভ্যাং সংস্থিতঃ কলশং দদৌ॥ **1.4.20** ॥

প্রসন্নো ৱল্কলং কশ্চিদ্ দদৌ তাভ্যাং মহাযশাঃ।
অন্যঃ কৃষ্ণাজিনমদাদ্ যজ্ঞসূত্রং তথাপরঃ॥ **1.4.21** ॥

কশ্চিৎ কমণ্ডলুং প্রাদান্মৌঞ্জীমন্যো মহামুনিঃ।
বৃসীমন্যস্তদা প্রাদাৎ কৌপীনমপরো মুনিঃ॥ **1.4.22** ॥

তাভ্যাং দদৌ তদা হৃষ্টঃ কুঠারমপরো মুনিঃ।
কাষাযমপরো ৱস্ত্রং চীরমন্যো দদৌ মুনিঃ॥ **1.4.23** ॥

জটাবন্ধনমন্যস্তু কাষ্ঠরজ্জুং মুদান্ৱিতঃ।
যজ্ঞভাণ্ডমৃষিঃ কশ্চিৎ কাষ্ঠভারং তথাপরঃ॥ **1.4.24** ॥

ঔদুম্বরীং বৃসীমন্যঃ স্বস্তি কেচিৎ তদাৱদন্।
আযুষ্যমপরে প্রাহুর্মুদা তত্র মহর্ষযঃ॥ **1.4.25** ॥

দদুশ্চৈৱং ৱরান্ সর্ৱে মুনযঃ সত্যৱাদিনঃ।
আশ্চর্যমিদমাখ্যানং মুনিনা সম্প্রকীর্তিতম্॥ **1.4.26** ॥

পরং কৱীনামাধারং সমাপ্তং চ যথাক্রমম্।
অভিগীতমিদং গীতং সর্ৱগীতিষু কোৱিদৌ॥ **1.4.27** ॥

আযুষ্যং পুষ্টিজননং সর্ৱশ্রুতিমনোহরম্।
প্রশস্যমানৌ সর্ৱত্র কদাচিৎ তত্র গাযকৌ॥ **1.4.28** ॥

রথ্যাসু রাজমার্গেষু দদর্শ ভরতাগ্রজঃ।
স্ববেশ্ম চানীয ততো ভ্রাতরৌ স কুশীলবৌ॥ **1.4.29** ॥

পূজযামাস পূজার্হৌ রামঃ শত্রুনিবর্হণঃ।
আসীনঃ কাঞ্চনে দিব্যে স চ সিংহাসনে প্রভুঃ॥ **1.4.30** ॥

উপোপবিষ্টৈঃ সচিবৈর্ভ্রাতৃভিশ্চ সমন্বিতঃ।
দৃষ্ট্বা তু রূপসম্পন্নৌ বিনীতৌ ভ্রাতরাবুভৌ॥ **1.4.31** ॥

উবাচ লক্ষ্মণং রামঃ শত্রুঘ্নং ভরতং তথা।
শ্রূযতামেতদাখ্যানমনযোর্দেববর্চসোঃ॥ **1.4.32** ॥

বিচিত্রার্থপদং সম্যগ্গাযকৌ সমচোদযৎ।
তৌ চাপি মধুরং রক্তং স্বচিত্তাযতনিঃস্বনম্॥ **1.4.33** ॥

তন্ত্রীলযবদত্যর্থং বিশ্রুতার্থমগাযতাম্।
হ্লাদযৎ সর্বগাত্রাণি মনাংসি হৃদযানি চ।
শ্রোত্রাশ্রযসুখং গেযং তদ্ বভৌ জনসংসদি॥ **1.4.34** ॥

ইমৌ মুনী পার্থিবলক্ষণান্বিতৌ
কুশীলবৌ চৈব মহাতপস্বিনৌ।
মমাপি তদ্ ভূতিকরং প্রচক্ষতে
মহানুভাবং চরিতং নিবোধত॥ **1.4.35** ॥

ততস্তু তৌ রামবচঃপ্রচোদিতা -
বগাযতাং মার্গবিধানসম্পদা।
স চাপি রামঃ পরিষদ্গতঃ শনৈঃ
বুভূষযাসক্তমনা বভূব হ॥ **1.4.36** ॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে বাল্মীকীযে আদিকাব্যে বালকাণ্ডে চতুর্থঃ সর্গঃ ॥